ननु वैराजे शरीरे जागरिते च प्रत्यगात्मा कथम् 'अहं' 'मम' इत्यभिमानभाग् भवितुमुत्सहते, न हि तस्यासङ्गोदासीनस्य क्वचिद् अहङ्कारो ममकारो वा युज्यते ?

तत्र; वस्तुतोऽभिमानाऽभावेऽपि कल्पनया तदुपपत्तेरित्यभिप्रेत्य; स्थूले शरीरे जागरिते च अहं-ममाभिमानवतः संज्ञां दर्शयन्नध्यात्मा-धिभूताधिदैवविभागाऽभावं सूचयति—तदुभयेति।

जिज्ञासा होती है कि आत्मा असंग अर्थात् अनात्मसंबंधरहित और उदासीन अर्थात् अनात्मप्रयुक्त-परिणामरहित है अतः किसी भी अनात्मवस्तु में उसे मैं-बुद्धि या मेरा-बुद्धि होना संगत नहीं तो विराट् शरीर और जागरित अवस्था में प्रत्यगात्मा को 'मैं' या 'मेरा' ऐसा अभिमान (अध्यास) कैसे हो पाता है ?

समाधान है कि वास्तविक मैं-बुद्धि आदि होना संभव न होने पर भी भ्रम से वैसा हो जाता है। इस तात्पर्य से स्थूल देह व जागरित अवस्था को 'मैं'-'मेरा' मानने वाले का नाम बताते हुए सूचित करते हैं कि अध्यात्म-अधिभूत-अधिदैव यह विभाजन अपारमार्थिक है यह कहकर कि 'शरीर और अवस्था में अभिमान वाला आत्मा विश्व है'। (अभिमानशब्द अध्यासबोधक होने से पूर्वोक्त तात्पर्य सूचित होता है)

अकारः

(एतत् त्रयम् अकारः।)

ननु वैराजशरीरं जागरितं तदुभयाभिमानी चेति कथमेतत् त्रयमद्वैतवादिभिरास्थीयते ? तत्राह—एतत्त्रयमिति।

विराट् शरीर, जागरित अवस्था एवं इनमें अभिमानी विश्व—ये तीन वे औपनिषद कैसे मान लेते हैं जो ब्रह्म से अन्य दूसरा भी कुछ नहीं स्वीकारते ? तीन सचमुच मानते तो यह प्रश्न उठता ! औपनिषद तो कह रहे हैं कि ये तीनों सिर्फ 'अ' यह अक्षर हैं। अतः अद्वैत से विरोध नहीं वरन् अद्वैत समझने का कदम ही है उक्त ढंग से समझना।

उकारार्थविस्तारः

(अपञ्चीकृतपञ्चमहाभूतानि पञ्चतन्मात्राणि।)

तदेवमाद्यमकारं निरूप्य मध्यमम् उकारं निरूपयितुं सूक्ष्मप्रपञ्चं कथयति—अपञ्चीकृतेति।

अयमर्थः—शब्दस्पर्शरूपरसगन्धाः तन्मात्राणि सूक्ष्मभूतानि परस्परम् अनुप्रवेशशून्यानि अपञ्चीकृतानि पञ्चसङ्ख्याकानि पूर्ववद् महान्ति च भविन्त।

पूर्वदर्शितरीति से 'अ' का निरूपण कर ॐ में मध्यवर्ती 'उ' का निरूपण करने के लिये सूक्ष्म संसार बताते हैं— 'अपंचीकृत पंचमहाभूत और उनका कार्य हिरण्यगर्भ है।' यह अभिप्राय है : स्थूल भूतों के प्रति कारण होने से 'तन्मात्र' कहलाने वाले शब्द-स्पर्श-रूप-रस-गंध सूक्ष्म भूत हैं जिन्हें पूर्वोक्त अनुपात में आपस में मिलाया न गया होने से वे अपंचीकृत हैं। संख्या में वे भी पाँच हैं और अपने कार्यों में अनुगत होने से महान् भी हैं।

सूक्ष्मकार्यम्

(तत्कार्यं च—पञ्चप्राणाः, दशेन्द्रियाणि, मनो, बुद्धिश्चेति सप्तदशकं लिङ्गं भौतिकं हिरण्यगर्भ इत्युच्यते। एतत् सूक्ष्मशरीरमात्मनः।)

तेषां च कार्यं—कर्मेन्द्रियपञ्चकं; ज्ञानेन्द्रियपञ्चकं; प्राणादिवायुपञ्चकं; बुद्धिः, मनश्च इत्यन्तःकरणद्वयम्; इति सप्तदशकं लिङ्गम्। तच्चेदं कयापि विधया प्रतीचो गमकत्वादेव 'लिङ्गम्' इति व्याख्यायते। 'तत्कार्यम्' उक्त्वा भौतिकत्वम् अभिदधानो लिङ्गस्य आहङ्कारिकत्वम् अप्रामाणिकमिति मन्यते। तदेतदपञ्चीकृतभूतपञ्चकं, लिङ्गम्, तच्च सप्तदशकं पूर्वोक्तं भूतकार्यतया भौतिकम्, सर्वमेतद् एकीकृत्य 'हिरण्यगर्भ'-शब्देन उच्यते। इति हिरण्यगर्भस्यापि विराडात्मवद् न आत्मत्वम्, किन्तु तदुपाधित्वम् इत्यभिप्रेत्याह—एतदिति।

सूक्ष्म भूतों का कार्य 'लिंग' है। पाँचों कर्मेन्द्रियाँ, पाँचों ज्ञानेन्द्रियाँ, प्राण आदि पाँचों वायुवृत्तियाँ तथा बुद्धि और मन इन दो प्रधान वृत्तियों वाला अन्तःकरण—इन सत्रह अवयवों वाला सूक्ष्मशरीर 'लिंग' कहलाता है क्योंकि

किसी भी ढंग से यह प्रत्यगात्मा का ज्ञापक बनता है। (अप्रकट वस्तु के बोधक को लिंग कहते हैं। इंद्रियचेष्टादि से प्रत्यगात्मा को समझा जा सकता है अतः इंद्रियादि लिंग हैं।) लिंगको भूतों का कार्य कहने से आचार्य ने अपनी मान्यता स्पष्ट कर दी कि इन्द्रियादि महाभूतों के परिणाम ही हैं, न कि सांख्यों की तरह सीधे ही 'अहंकार' के कार्य। यह भी द्योतित हुआ कि 'मैं' अनुभव वास्तव में लिंगकों विषय नहीं करता।

ये अपंचीकृत पाँचों भूत और पूर्वकथित लिंग जो सत्रह हिस्सों वाला तथा भूत जन्य अतः भौतिक है; ये सब मिलाकर 'हिरण्यगर्भ' शव्द से कहे जाते हैं। यों स्पष्ट है कि जैसे विराट् आत्मा नहीं वैसे हिरण्यगर्भ भी आत्मा नहीं बल्कि आत्मा की उपाधि ही है। अतः मूलकार ने कहा 'यह आत्मा का सूक्ष्म शरीर है।' (इन्द्रियों से अगोचर होने के कारण यह सूक्ष्म है।)

स्वप्नः

(करणेषु उपसंहृतेषु जागरितसंस्कारजः प्रत्ययः सविषयः स्वप्न इत्युच्यते।)

अथाधुना चास्य भोगायतनत्वं यत्र, तम् अवस्थाविशेषं लक्षयति—करणेष्विति। 'प्रत्ययः स्वप्न' इत्युक्ते सुषुप्तौ अतिप्रसक्तिः मा भूद् इत्युक्तं 'सविषयः' स्वप्न इति। वासनामयविषयसहितः स्वप्नेऽपि प्रत्ययो भवतीत्यर्थः। जागरितव्यावृत्त्यर्थमुक्तम् 'करणेषूपसंहृतेषु' इति। ननु तर्हि करणाऽभावात् कथमयं प्रत्ययः समुद्भवेद् ? इत्याशङ्क्याह—जागरितेति। 'संस्कार'-ग्रहणं न कारणान्तरपरिसङ्ख्यार्थं, कारणान्तरस्य अदृष्टादेरिष्टत्वाद् इति द्रष्टव्यम्।

अब यह समझाना है कि सूक्ष्मशरीर भी भोगोपयोगी ही है। जिस स्थिति में वह विशेषतः भोगस्थान बनता है उसकी परिभाषा करते हैं—'इन्द्रियों द्वारा अपना कार्य करने से विरत हो जाने पर जागरित में पड़े संस्कारों से

उत्पन्न सविषय ज्ञान स्वप्न है।'

'ज्ञान स्वप्न है' कहते तो गहरी नींद में लक्षण जा सकता था अतः 'सविषय ज्ञान' ऐसा कहा। (अर्थात् स्वप्न में विषय और ज्ञान दोनों हैं और ज्ञान विषयविशेषित प्रतीत होता है। 'विषय' भी शब्दादिरूप विवक्षित हैं।) तात्पर्य है कि सपने में भी ज्ञान होता है किंतु उसके साथ वासनामय विषय भी होते हैं। ('वासनामय' अर्थात् जागरितादि के अनुभवों से चित्त में पड़ी विषय की छाप—जिसे वासना, संस्कार आदि कहते हैं— के सहारे निर्मित मायिक पदार्थ।) स्वप्नलक्षण जागरित में न जाये इसलिये इंद्रियों की निर्व्यापारता होना भी तब ज़रूरी बताया। इंद्रिय कार्यकारी नहीं तो स्वप्न में ज्ञान उत्पन्न किससे होता है? जागरित में बटोरे संस्कारों के निमित्त से ही वह पैदा हो जाता है 'जागरित के संस्कार' यों जो संस्कार कहा उससे यह नहीं समझना चाहिये कि संस्कार से अन्य कोई कारण स्वप्न का है ही नहीं क्योंकि पुण्य-पाप आदि संस्कारभिन्न कारण स्वीकार ही है।

तैजसः

(तदुभयाभिमान्यात्मा तैजसः।)

इदानीं हिरण्यगर्भशरीरे स्वप्ने च अहं-ममाभिमानवतः संज्ञां सञ्ज्ञिरते—तदुभयेति। तैजसः—तेजसि वासनायाम् अभिमानितया निर्वृतो भवतीति व्युत्पत्त्योच्यते।

हिरण्यगर्भ देह और स्वप्न अवस्था में 'मैं'-'मेरा'—अभिमान वाले का नाम है तैजस। तेज अर्थात् वासना, उसमें अभिमानी होने से जो तृप्त होता है उसे तैजस कहना संगत है।

उकारः

(एतत् त्रयमुकारः।)

न च सूक्ष्मशरीरं स्वप्नावस्था च तयोरभिमानीति एतत्त्रितयाङ्गीकारेण

द्वैतमाशङ्कितव्यमित्याह—एतत् त्रयमुकार इति।

सूक्ष्म देह, स्वप्नावस्था और इनमें अभिमानी आत्मा – ये तीन मानने पर द्वैत को अनुमति हो गयी ऐसा नहीं समझना चाहिये क्योंकि ये तीनों सिर्फ 'उ' यह अक्षर हैं।

मकारार्थप्रपञ्चः

(शरीरद्वयकारणम् आत्माऽज्ञानं साभासम् अव्याकृतमिति उच्यते। एतत् कारणशरीरमात्मनः।)

ननु अकारात्मकस्थूलशरीरस्य उकारात्मकसूक्ष्मशरीरस्य च पारमार्थिकत्वाभ्युपगमे द्वैतता स्याद् इति ? नेत्याह—शरीरद्वयेति। कथं पुनः आत्माश्रयमात्मविषयं चाऽज्ञानं कार्याय पर्याप्तमचेतनत्वादिति ? तत्राह—साभासमिति। कुलालाद्यधिष्ठितं हि मृदादि घटादिकं कुर्वदुपगम्यते, तद्वत् चिदाभासव्याप्तमज्ञानं शरीरद्वयाकारेण परिणमते विवर्तत इत्यर्थः। 'तद्धेदं तर्ह्यव्याकृतमासीद्' (बृ. १.४.७) इत्यादिश्रुतावव्याकृतस्य कारणत्वश्रुतेः कथमात्माज्ञानस्य तु तदुक्तम् ? इत्याशङ्क्य; तत्रैव अव्याकृतशब्दप्रयोगाद् नैवमित्याह—अव्याकृतमिति।

अ-शब्द रूप स्थूल शरीर एवं उ-शब्द रूप सूक्ष्म शरीर को वास्तविक मानने पर द्वैत स्वीकृत हो जायेगा जो यहाँ विवक्षित नहीं अतः मूल में कहा—'दोनों शरीरों का कारण है आभासयुक्त आत्मा-अज्ञान जिसे अव्याकृत भी कहते हैं। यही आत्मा का कारणशरीर भी है।' जड होने से अज्ञान, जो आत्मा पर टिका है और आत्मा के ही बारे में है, कार्य उत्पादन में समर्थ नहीं हो सकता अतः कार्यसमर्थ कारण कहने के लिये अज्ञान को 'आभासयुक्त' कहा। कुम्हार आदि द्वारा नियंत्रित मिट्टी आदि ही घट आदि व्यवस्थित कार्य उत्पन्न करते हुए स्वीकारे जाते हैं, ऐसे चेतन की छाया अर्थात् अभिमान से घिरा अर्थात् विषयभूत अज्ञान उक्त दोनों शरीरों के

रूप में बदल जाता है अर्थात् आत्मा में वास्तविक अंतर आये बिना उसे अपने से अनुगत हुए देहद्वयका अनुभव हो जाये यह संभव करा देता है। शंका हो सकती है कि वेद ने 'अव्याकृत' को कारण कहा है, यहाँ अज्ञानको कैसे कारण कह दिया ? समाधान है कि अज्ञानको ही वेद ने अव्याकृत कहा है।

अज्ञानम्

(तच्च न सत्, नासत्, नापि सदसत्; न भिन्नं, नाभिन्नं, नापि भिन्नाभिन्नं कुतश्चित्; न निरवयवं, न सावयवं, नोभयम्; किन्तु केवलब्रह्मात्मैकत्वज्ञानापनोद्यम्।)

मूलकार ने अज्ञानका परिचय दिया है– 'वह सत्, असत् या सदसत् (जो सत् भी हो और असत् भी ऐसा) नहीं है। वह किसी से भिन्न, अभिन्न या दोनों नहीं है। न वह हिस्सों वाला है, न हिस्सों रहित और न ही दोनों। फिर वह क्या है ? केवल ब्रह्म और अपनी एकता के ज्ञान से बाध होने योग्य पदार्थ वह अज्ञान है।' इसकी व्याख्या टीकाकार सुस्पष्ट करने जा रहे हैं।

सदसद्वैलक्षण्यम्

शरीरद्वयहेतोरव्याकृतस्य अर्थक्रियाकारित्वेन सत्त्वाभ्युपगमात्, तत्कार्यस्यापि तथात्वाद्, अद्वैतानुपपत्तिः ? इत्याशङ्क्याह–तच्चेति। तस्यापि सत्त्वे 'सदेव' इति ब्रह्मणि अवधारणायोगाद् अभिधास्यमानज्ञानापनोद्यत्वाऽनुपपत्तेश्च सत्त्वासिद्धिरित्यर्थः।

तर्हि सत्त्वनिषेधाद् असत्त्वमेव स्याद् नभोनलिनीवदिति चेद् ? नेत्याह–नासदिति। 'अज्ञोऽहम्' इत्यपरोक्षप्रतीतिविरोधाद् अर्थक्रियाकारित्वाच्च नात्यन्तिकमसत्त्वम्। न च परस्परविरोधे सत्त्वासत्त्वयोर्वि-

धान्तरानुपपत्तिः; संसर्गाभावान्योन्याभावयोर्भेदप्रतिपादको योऽन्योन्याभावः स यथा एतदुभयविलक्षणः तद्वदत्रापि सत्त्वाऽसत्त्वविलक्षण इत्यर्थः। अभावान्योन्याभावयोरन्योन्याभावस्य तद्भावानभ्युपगमवद् इहापि सत्त्वस्य असत्त्वस्य चानभ्युपगमसम्भवादिति भावः।

अस्तु तर्हि प्रत्येकं सत्त्वासत्त्वप्रतिषेधेऽपि समुच्चितं सदसदात्मकम् अव्याकृतमिति चेद् ? मैवम्; विरोधाद् एकत्र तद्भावाऽसम्भवादित्याह— नापीति।

दोनों शरीरों के प्रति कारणभूत अव्याकृत क्योंकि सप्रयोजन क्रिया में समर्थ है इसलिये सत् माना जायेगा और उसका कार्य भी सत् ही होगा तो अद्वैत कैसे संगत हो सकेगा ? इस प्रश्न का उत्तर देने के लिये बताया कि अज्ञान सत् नहीं है। शास्त्र ने निश्चित कर कहा है कि ब्रह्म ही इकलौता सत् है अतः अव्याकृतादि को सत् मान नहीं सकते। किं च अव्याकृत तत्त्वज्ञान से निवृत्त होता है इससे भी त्रिकालाबाध्यतालक्षण सत्त्व उसमें नहीं हो सकता। सप्रयोजन क्रिया में सामर्थ्य (या काम चलाऊ होना) अव्याकृत में भले ही हो, उसे सत्त्व नहीं कह सकते क्योंकि कभी बाध न होने वाला ही सत् होता है।

तो क्या आकाशपुष्प की तरह अव्याकृत असत् है ? नहीं, वह असत् भी नहीं। 'मैं अज्ञानी हूँ' यों साक्षात् अनुभव का विषय बनने वाला अज्ञानरूप अव्याकृत असत् नहीं हो सकता क्योंकि असत् का कभी साक्षात् अनुभव नहीं हो सकता। प्रयोजन वाली क्रिया करने वाला होने से भी अव्याकृत असत् नहीं है। सत्त्व-असत्त्व आपस में विरोधी हैं अतः अव्याकृत सत् या असत् ही हो सकता है, इन दोनों से अन्य किसी ढंग का वह कैसे होगा? बताते हैं—प्रागभाव, ध्वंस और अत्यंताभाव का संमिलित नाम है संसर्गाभाव तथा भेद का नाम है अन्योन्याभाव। अभाव दो तरह का ही मानते हैं। संसर्गाभाव और अन्योन्याभाव में जो अन्तर है उसका निर्वाह करने वाला

जो अन्योन्याभाव है उसे संसर्गाभाव और अन्योन्याभाव से अलग ही मानना पड़ेगा (चाहे इसका अभिप्राय निकले कि अभाव दो नहीं तीन तरह का है)। ऐसे ही प्रकृत में भी सत्त्व-असत्त्व से विलक्षण होना संगत समझना पड़ेगा। संसर्गाभाव और अन्योन्याभाव के अंतर को जैसे इन दोनों में से किसी का रूप नहीं मान सकते वैसे अव्याकृत को न सत् और न असत् मानें यह उपपन्न है। (वस्तुतः तो सत्त्व-असत्त्व का परस्पर विरोध ही ऐसा नहीं कि इनसे विलक्षण होना असंभव हो, यह अन्यत्र स्पष्ट है।)

सत् या असत् न होने पर भी सद्-असद् रूप ही अव्याकृत हो सके यह भी संभव नहीं क्योंकि सत्त्व-असत्त्व इकट्ठे ही रह नहीं सकते, कारण कि इनका विरोध है। (इस तरह अव्याकृत सत् और असत् से विलक्षण या अनिर्वचनीय सिद्ध हुआ)

भेदाभेदविलक्षणता

तर्हि सतः, असतः, सदसद्भ्यां वा भिन्नमिति चेद् ? नेत्याह—न भिन्नमिति। न हि भेदो धर्मत्वेन स्वरूपत्वेन वा प्रतिपादयितुं शक्यते। धर्मत्वे भेदाभेदविकल्पप्रवेशप्रसङ्गात्। स्वरूपत्वे च अन्यतरपरिशेषापातादित्यर्थः। भेदनिषेधे प्राप्तमभेदं निरस्यति—नाभिन्नमिति। सदसद्भ्यामन्यतमपरिशेषे पूर्वोक्तदोषानुषङ्गात्। अव्याकृतमात्रपरिशेषे च वस्त्वप्रसिद्धेः तदसिद्धिरित्यर्थः।

भेदाभेदयोरेकैकस्य निषेधेऽपि प्राप्तं भिन्नाभिन्नत्वं विरोधात् प्रत्याचष्टे—नापि भिन्नाभिन्नं कुतश्चिदिति। सतोऽसतश्चेति प्रत्येकं, मिलितस्य च प्रतियोगित्वमुच्यत इति ज्ञातव्यम्।

तब क्या अव्यक्त सत्से, असत्से और सदसत्से वास्तव में अलग ही है ? नहीं, वह किसी से वस्तुतः भिन्न नहीं। भेद न तो विशेषता के रूप में और न ही स्वरूप के रूप में समझाया जा सकता है। यदि भेद को पदार्थ

की विशेषता मानें तो पुनः प्रश्न रहेगा कि वह विशेषता पदार्थ से अलग है या नहीं ? इस प्रकार अनिश्चय की स्थिति हो जायेगी। और यदि भेद को उन पदार्थों का निजी रूप ही मानें जिन्हें वह 'भिन्न' (भेदवान्) बना रहा है, तो दोनों पदार्थों से अतिरिक्त 'भेद' कुछ रहा ही नहीं कि किसी को भिन्न बना सके।

अव्याकृत सत् आदि से अलग नहीं तो क्या उनसे अभिन्न ही है ? ऐसा भी नहीं क्योंकि अगर उसे सत्से एक मानें तो बाध्य नहीं होगा, असत्से एक मानें तो उसका अपरोक्ष अनुभव नहीं घटेगा और उभयरूप तो विरोधवश मान ही नहीं सकते। कोई कह सकता है कि अव्याकृत ही इकलौता तत्त्व है, बाकी सब उसी से अभिन्न है अतः सत् आदि को अव्याकृतरूप ही मान लें तो क्या हानि है अर्थात् अव्याकृताद्वैत या जडाद्वैत मानने में क्या दोष ? ऐसा पूछने वाले को समझा देना चाहिये कि जैसे चेतन स्वतः सिद्ध सच्चिदानन्दरूपता वाला है और उसके वैसे रूप में श्रुति प्रमाण है, उस तरह उक्त ढंग का अव्याकृत न स्वतः सिद्ध है और न प्रामाणिक अतः उससे सभी की एकता अमान्य है।

सत् आदि से भेद या अभेद न होने पर भी भेदाभेद होता होगा यह भी नहीं समझना चाहिये क्योंकि 'भेदाभेद' यह निरर्थक शब्द ही है ! भेदाभेद के प्रति प्रतियोगी रूप से सत् आदि हर-एक और दोनों मिलकर भी विवक्षित हैं। (अर्थात् न सत् से भेदाभेद है, न असत् से, न सदसत् से।)

(प्रसंगवश जान लेना चाहिये कि जैन दर्शन का अनेकांतवाद यह नहीं है। वे पदार्थों के बारे में सात संभावनायें इकट्ठे ही मौजूद मानते हैं, वस्तु को 'है' और 'नहीं है' आदि एक साथ ही मानते हैं जो युक्ति और अनुभव से विरुद्ध है। मिथ्यात्व का अभिप्राय है कि ब्रह्मज्ञान से बाध्य अतः सत् नहीं और अपरोक्ष प्रतीयमान अतः असत् नहीं, दोनों से विलक्षण व्यावहारिक है।)

अवयवनैरपेक्ष्यम्

सत्त्वादिना निर्वक्तुमशक्यत्वेऽपि मूलकारणत्वादव्याकृतं निरवयवत्वेन शक्यं निर्वक्तुम्? इत्याशङ्क्याह—न निरवयवमिति। न हि तस्य अनात्मनो निरवयवत्वं, तत्तन्नानाविधप्रपञ्चाकारपरिणामित्वाद् इत्यर्थः। तर्हि परिणामित्वादेव मृदादिवदेष्टव्यं सावयवत्वम्? इत्याशङ्क्याह—न सावयवमिति। सावयवत्वे कार्यद्रव्यत्वेन मूलकारणत्वानुपपत्तेः, तत्तत्कार्याकारपरिणामस्य च मिथ्यात्वेन विवर्तत्वादित्यर्थः। अर्थ-प्राप्तमुभयरूपत्वं विरोधेन प्रत्यादिशति—नोभयमिति।

अव्याकृत को सत्, असत्, सदसत् यों भले ही परिभाषित न किया जा सके उसे निरवयव रूप से तो निश्चित किया ही जा सकता है क्योंकि वह प्रपंचका मूल (अंतिम) कारण है और यदि सावयव हो तो स्वयं कार्य ही होगा, मूल अर्थात् अकार्य नहीं होगा—यह शंका है। समाधान है कि अव्याकृत जड है और तरह-तरह के प्रपंचांशों के रूप में बदलता है अतः निरवयव नहीं हो सकता। (कारण को कार्यका अवयव मानना पड़ता है जैसें धागों को कपड़े का अवयव समझा जाता है।) तब क्या मिट्टी आदि की तरह कार्याकार ग्रहण करने वाला होने से वह सावयव ही है ? नहीं है, क्योंकि तब वह अंतिम कारण नहीं हो सकता। बिना सावयव हुए वह विविध कार्यों का आकार कैसे लेता है ? कार्याकार और वह आकार ग्रहण करना अवास्तविक है अतः बिना सचमुच सांश हुए भी अव्याकृत कार्याकार में प्रतीत हो यह संगत है। वास्तविक बदलाव ही सांशता चाहता है। सावयव-निरवयव दोनों हो, यह तो व्यर्थ की बात होगी अतः अव्याकृत को उभयरूप कहना असंगत है।

ज्ञाननिवर्त्यत्वम्

ननु केनाऽपि प्रकारेण निर्वचनाऽसंभवेऽपि किन्तदनिर्वचनीयत्वम्,

न हि लक्षणमन्तरेण लक्ष्याधिगतिरस्ति ? तत्राह—किन्त्विति। अस्य अज्ञानस्य सर्वथा उक्तलक्षणशून्यत्वाद्, अत एव निर्वक्तुमशक्यत्वाद्, यत्किञ्चिच्छब्दवाच्यत्वेन तत्सिद्धेः आत्मनि द्वैतोत्पत्तिः सिद्धा।

तन्निवारणार्थं तद्धानोपायमाह—केवलेति। निरालम्बनज्ञानाऽयोगाद् यत्किञ्चिदालम्बनज्ञानस्य च सनिदानसंसारनिराससाधनत्वासम्भवात् तदुचितं विषयं दर्शयति—ब्रह्मात्मैकत्वेति।

सत् आदि रूप से परिभाषा न बनायी जा सकने पर भी कोई तो तरीका उसे समझाने का होगा क्योंकि अपने खास रूप से वस्तु समझ आये इसका उपाय हुए बिना किसी वस्तु की सही जानकारी संभव नहीं। यों समझने के उपाय की जिज्ञासा होने पर मूलकार ने बताया कि केवल ब्रह्म-आत्मा की एकता के ज्ञान से वह अव्याकृत मिटता या बाधित होता है। एवं च सद्-असत् विकल्पों में न बँध पाना—यह एक खास रूप है अव्याकृत का जिसे सदसद्विलक्षणत्व या अनिर्वचनीयत्व कहते हैं। दूसरा खास रूप है ज्ञाननिवर्त्यत्व। अव्याकृत अज्ञान ही है जो सत्त्व आदि असाधारण रूपों वाला किसी तरह नहीं हो सकता अतः उन सन्दर्भों से परिभाषित नहीं किया जा सकता। उसे समझना इसीलिये ज़रूरी है ताकि शास्त्र में जो यह कहा कि इकलौते आत्मा के रहते ही सारा भेद उपस्थित है, वह संगत लग पाये; और इसके लिये इतना ही पर्याप्त है कि किसी शब्द के अर्थरूप से हम अव्याकृत या अज्ञान का ग्रहण कर लें, उसके प्रमाणित या विशिष्ट लक्षणयुक्त होने की आवश्यकता नहीं। अविद्या हटाने के लिये उपयोगी उपाय मूल में अद्वैत ज्ञान बताया। ज्ञान को कोई सहारा चाहिये अज्ञान मिटाने के लिये; वह सहारा ही उसका 'विषय' कहलाता है। बिना विषय के ज्ञान अज्ञाननिवर्तक नहीं हो पाता। चाहे जो विषय बनने पर तो सकारण प्रपंच के निवर्तक ज्ञान की प्राप्ति होती नहीं (अन्यथा घटादि के ज्ञान से मोक्ष हो चुकना चाहिये) अतः मोक्षप्रद ज्ञान के लिये उचित विषय मूलकार ने स्पष्ट किया है। (केवल

अर्थात् उपाधि से असंबद्ध रूप से समझ लिये गये जो ब्रह्म और जीव, उनकी एकता अर्थात् अभेद का ज्ञान अर्थात् अनुभव।)

कर्मसमुच्चयनिषेधः

अथ यथोक्तं ज्ञानम् अग्निहोत्रादिसहितं फलसाधनं, साधनभूयस्त्वे फलभूयस्त्वसम्भवात् ? मैवम्; मिथो विरुद्धयोः समुच्चयाऽयोगात्, फलस्य च कैवल्यस्य निरतिशयत्वाद् इत्याशयवानाह—केवलेति।

मूलस्थ 'केवल' शब्द का एक और भी तात्पर्य है। पूर्वोक्त अद्वैतबोध अग्निहोत्रादि कर्म, योग, प्रसंख्यान आदि का साथ पाने से फलोपाय होना चाहिये क्योंकि अधिक साधन हों तो फल में भी विशेष देखा जाता है—यह सहज संभावना है। 'केवल' शब्द से इसे हटाया है। बोध और कर्मादि आपस में विरोधी हैं अतः एक फल के लिये वे बोध से मेल करें यह असंभव है। मोक्षरूप फल में तारतम्य है नहीं कि उपायबाहुल्य से कोई विशेष हो सके। अतः सिर्फ तत्त्वानुभव ही अविद्यानिवृत्ति में पर्याप्त उपाय है।

सुषुप्तिः

(सर्वप्रकारज्ञानोपसंहारे बुद्धेः कारणात्मनाऽवस्थानं सुषुप्तिः।)

अव्याकृतस्य अनिर्वाच्यस्य आधिदैविकीमवस्थामुक्त्वा सम्प्रति आध्यात्मिकीमवस्थां तदेकत्वविवक्षया दर्शयति—सर्वप्रकारेति। इन्द्रियसंस्पृष्टस्थूलार्थाकारतया स्थूलत्वं, वासनारूपसूक्ष्मार्थाकारतया सूक्ष्मत्वं च ज्ञानानां सर्वप्रकारत्वम्। तेषामशेषविशेषविज्ञानानामुपरमो मुक्तावपि सम्भवतीत्येतदुक्तम्—बुद्धेरिति। अन्तःकरणस्य कारणाकाररूपेणावस्थानमवस्थान्तरे जागरितादावस्तीत्याद्यं विशेषणम्।

अनिर्वाच्य अव्याकृत का आधिदैविक या समष्टि रूप है अद्वैत का अज्ञान यह बताया। अब देह में वह जब स्पष्ट प्रतीत होता है उस अवस्था

का वर्णन करते हैं ताकि अध्यात्म को अधिदैव से अभिन्न समझ सकें। 'सभी तरह के ज्ञानों का विराम होने पर बुद्धि का अपने कारण रूप से रहना सुषुप्ति है।' ज्ञानके सब अर्थात् दो प्रकार या अवस्थिति के ढंग हैं : (१) स्थूल—इंद्रियों से संबंध वाले स्थूल विषयों से यों विशेषित होकर रहना कि उनका अनुभव होता रहे। और (२) सूक्ष्म—संस्कार रूप से स्थित विषयों से यों विशेषित होकर रहना कि उनकी स्मृति उत्पन्न हो सके। सुषुप्ति में इन दोनों तरहों से ज्ञान नहीं रहता। (उस अवस्था में विषयस्मृति भी संभव नहीं।) मोक्ष में भी यों ज्ञानविराम कहा जा सकता है पर वहाँ बुद्धि रहती ही नहीं जबकि सुषुप्ति में वह बनी रहती है, केवल तत्काल कार्यकारी नहीं होती, यह दोनों में अंतर है। जागरणादि अन्य अवस्थाओं में भी अन्तःकरण कारण के आकार से भी रहता ही है (जैसे घटादि मृदाकार से तो हैं ही) अतः सुषुप्ति की विशेषता कही तब सब प्रकार के ज्ञानों का विराम रहता है, अन्यदा तो ज्ञान व्यक्त रहते हैं।

कारणरूपस्थितिः

किमिदं कारणात्मना बुद्धेः अवस्थानम्—(१) किं कारणस्य बुद्धेश्च अवस्थानम् ? (२) किं कारणस्यैव तद्वासनावासितस्यैव पुनर्बुद्ध्युत्पादनयोग्यस्य ? प्रथमे, जागरितादेरविशेषः सुषुप्ते स्यात्। द्वितीये, बुद्धिग्रहणमनर्थकम्।—इति चेद् ? मैवम्। बुद्धेर्यत् कारणं तस्यैव तद्वासनावासितस्य पुनर्बुद्ध्युत्पादनयोग्यस्य स्थितेरिष्टत्वाद् इति द्रष्टव्यम्।

कारणरूप से बुद्धि रहती है का क्या मतलब ? एक अर्थ हो सकता है कि कारण और बुद्धि दोनों रहते हैं। दूसरा अर्थ हो सकता है कि बुद्धि-संस्कारयुक्त कारण ही रहता है जो फिर बुद्धि को पैदा कर सकता है। यदि प्रथम अर्थ है तब तो सुषुप्ति अन्य अवस्थाओं से अलग नहीं रहेगी (और तीन अवस्थायें होती हैं यह अनुभवादि विरुद्ध पड़ेगा।) यदि दूसरा अर्थ हो तो 'बुद्धि कारणरूप से रहती है' यों बुद्धि का ग्रहण व्यर्थ है, केवल इतना

पर्याप्त है कि 'कार्योत्पादनयोग्य कार्यवासित कारण रहना सुषुप्ति है'। अतः मूल में बुद्धि का कथन क्यों ? उत्तर है कि प्रथम अर्थ तो विवक्षित नहीं है। द्वितीय अर्थानुसार यदि बुद्धि न कहते तो सब कार्यों का विलय कथित होता जिससे लक्षण प्रलय में भी चला जाता। वैसा न हो अतः बुद्धि का जो कारण है वह ही बुद्धिसंस्कारयुक्त हुआ रहे ताकि पुनः बुद्धि उत्पन्न कर सके। इस तरह मूलोक्त लक्षण संगत है।

प्राज्ञः

(तदुभयाभिमान्यात्मा प्राज्ञः।)

सम्प्रति अव्याकृताभिमानिनाऽन्तर्यामिणा सहैकत्वं सुषुप्त्यभिमानिनः सिद्धवत्कृत्य तद्विषयसंज्ञाविशेषं व्यवहारलघुतायै निवेदयति—तदुभयेति। प्राज्ञ इति—प्रज्ञा चैतन्यं, तत्प्रधानः पुरुषः प्राज्ञशब्दार्थः। तदुपाधिभूतकारणस्य तत्प्रकाश्यत्वेन उपसर्जनत्वात्।

अव्याकृत में अभिमान रखने वाला अन्तर्यामी और सुषुप्ति में अभिमान रखने वाला जीव अभिन्न हैं यह मानी बात है। सरलता से व्यवहार संभव करने के लिये सुषुप्त्यभिमानी का खास नाम बताया है 'प्राज्ञ'। कारणशरीर और सुषुप्ति अवस्था, दोनों में अभिमान वाला चेतन प्राज्ञ है। प्रज्ञा कहते हैं ज्ञान को, वही जिसमें प्रधान हो उस पुरुष का नाम हुआ प्राज्ञ। अभिमानी तो सोपाधि है अतः उपाधि नहीं चेतन प्रधान है यह निर्णय कैसे ? अभिमानी का उपाधिरूप कारणशरीर तो चेतन से प्रकाशित ही होने वाला है अतः उसकी गौणता निर्णीत है। (जो अपनी सिद्धि के लिये अन्य पर निर्भर हो वह उसका गुणभूत होता है।)

मकारः

(एतत् त्रयं मकारः।)

अव्याकृतं, सुषुप्तिः, उभयोरभिमानी च—इति त्रितयं

मकारान्तर्भूतत्वाद् मिथो न पृथगित्यद्वैतमनुस्मरन्नाह—एतत् त्रयं मकार इति।

कारण शरीर, सुषुप्ति अवस्था और इनमें अभिमानी—ये तीनों 'म' में ही कल्पित हैं, आपस में वस्तुतः अलग नहीं अतः अद्वैत निश्चित है इसलिये कहा कि ये तीनों सिर्फ 'म' यह अक्षर हैं।

प्रमाणोल्लेखः

स्थूलप्रपञ्चात्मनो विराजः, जागरितस्य, तदुभयाभिमानिनो विश्वस्य अकारत्वम्; सूक्ष्मप्रपञ्चात्मनो हिरण्यगर्भस्य, स्वप्नस्य, तदुभयाभिमानिनस्तैजसस्य उकारत्वम्; प्रपञ्चद्वयकारणभूताव्याकृतस्य, सुषुप्तेः, तदुभयाभिमानिनश्च प्राज्ञस्य मकारत्वम्;—इत्युक्तमुपनिषत्प्रामाण्यात् प्रतिपत्तव्यम्।

स्थूल प्रपंचरूप विराट्, जागरितावस्था और दोनों में अभिमानी विश्व तीनों केवल 'अ' हैं; सूक्ष्म प्रपंचरूप हिरण्यगर्भ, स्वप्नावस्था और दोनों में अभिमान रखने वाला तैजस, तीनों केवल 'उ' हैं; स्थूल-सूक्ष्म प्रपंचों का कारण अव्याकृत, सुषुप्ति अवस्था और दोनों में अभिमानी प्राज्ञ, ये तीनों 'म' हैं;—यह जो कहा वह माण्डूक्य आदि उपनिषदों के अनुसार है यह समझ लेना चाहिये। (अर्थात् यह औपनिषद प्रक्रिया है)।

अथापवादः

(अकार उकारे, उकारो मकारे, मकार ओङ्कारे, ओङ्कारोऽहम्येव।)

तथापि त्रयाणामकारादीनां मिथो विभक्तानाम् अवस्थानात् कुतोऽद्वैतं सिद्ध्यति ? इत्याशङ्क्य; अपवादप्रक्रियां प्रकटयति—अकार इति।

अनुभूयमान भेद अध्यात्मादि त्रिविधमात्र और वे अकारादिमात्र हों तो भी अ-उ-म ये आपस में पृथक् तीन रह गये तो अद्वैत कैसे ? इसका जवाब देने के लिये इनका अपवाद करने का तरीका समझाते हैं— 'अ लीन होता है उ में, उ लीन होता है म में, म लीन होता है ॐ में, ॐ लीन होता है 'मैं' में।' (अपवाद अर्थात् स्वतंत्र सत्ता-स्फूर्तिकता नहीं है यह निश्चय।)

भूतपर्यन्तं लयः

अस्यार्थः—स्थूलभूतकार्यं समष्टिव्यष्ट्यात्मकम् अधिदैवतादिभेद-भिन्नं दृश्यं सर्वं स्थूलभूतात्मना प्रलीयते। तानि च स्थूलानि भूतानि पञ्चीकृतानि अवस्थाभिमानिसहितानि अकारात्मकानि अपञ्चीकृतभूतेषु विलीयन्ते। तत्कार्यं च सप्तदशकं लिङ्गम् आरम्भणाधिकरणन्यायेन तन्मात्रतां प्रतिपद्यते।

अधिदैव-अध्यात्म-अधिभूत हिस्सों में बँटा सारा दृश्य चाहे समष्टि रूप हो या व्यष्टिरूप, है स्थूल भूतों का कार्य अतः विचार करें तो निश्चय हो जाता है कि स्थूल भूतों से अन्य वह कुछ नहीं है क्योंकि बादरायणमुनि ने निर्णय दिया है कि क्योंकि वेद ने कहा है कि कार्य सिर्फ कहने को है इसलिये कारण से अलग कार्य कुछ है नहीं (ब्र.सू. २.१.१४)। वे पंचीकृत स्थूल भूत, उनकी जागरित अवस्था और अभिमानी विश्व, तीनों अ-शब्द से अभिन्न हैं और विचार करने पर वे अपने कारणरूप अपंचीकृत भूतों से अलग कुछ नहीं हैं। सूक्ष्म भूतों से बना सत्रह अवयवों वाला लिंग शरीर भी अपंचीकृत भूतों से अलग नहीं। सर्वत्र नियम वही है जो बादरायण जी ने बताया।

भूतलयः

तानि च अपञ्चीकृतानि सूक्ष्मभूतानि अवस्थाभिमानिसहितानि उकारात्मकानि संभूतिवैपरीत्येन प्रलयं प्रतिपद्यन्ते। तत्र—पृथिवी

गन्धतन्मात्रात्मिका रसतन्मात्रात्मिकास्वप्सु, ताश्चापो रूपतन्मात्रे तेजसि, तत्तेजः स्पर्शतन्मात्रे वायौ, स च वायुः शब्दतन्मात्रे नभसि, तच्च अविद्यासहाये सच्छब्दिते ब्रह्मणि अव्यक्ते, तच्च अव्यक्तम् अवस्थाभिमानिभ्यां सहितं मकारात्मकं कार्यकारणविभागविकले निष्कले परिशुद्धे ब्रह्मणि ओङ्कारलक्षिते विलीयते। न तस्मात्परं किञ्चिदस्ति।

स्वप्नावस्था और अभिमानी तैजस समेत अपंचीकृत भूत, जिन्हें 'उ' से एक बताया था, उत्पत्तिकी अपेक्षा उलटे क्रम से विलीन होते हैं— गंधतन्मात्र रूप पृथ्वी रसतन्मात्र जल में लीन होती है। (तन्मात्र=स्थूलावस्थ पृथिव्यादि के प्रति कारण।) लीन होने का अर्थ पूर्वोक्त नीति से यह समझ आ जाना ही है कि जल से अलग पृथ्वी कुछ नहीं। जल का विलय रूपतन्मात्र तेज में, तेजका स्पर्शतन्मात्र वायु में, वायु का शब्दतन्मात्र आकाश में, —यों सभी भूत आकाशमात्र रह जाते हैं। आकाश का विलय होता है 'सत्' नामक अव्यक्त अर्थात् मायाशक्तियुक्त ब्रह्म में। अव्यक्त अर्थात् साभास अज्ञान या कारण शरीर, सुषुप्ति अवस्था और अभिमानी प्राज्ञ सहित—जो केवल 'म' रूप बताया था—ओंकार के द्वारा लक्षित निरुपाधि ब्रह्म में विलीन होता है। वह ब्रह्म कार्यकारणभाव से रहित है, निरंश है अर्थात् उपाधिसंपर्करहित है। उससे परे—अर्थात् उसका अधिष्ठान—कुछ नहीं है क्योंकि वही सन्मात्र चिद्धातु है। (मूल के अकारादि अपने-अपने समस्त विस्तारों सहित विवक्षित हैं। मकार तक वाच्य अभिप्रेत है तथा ॐ यह वाक्य भी है जिसके घटक पद अ-उ-म हैं। वाक्य अखण्डशब्द माना गया है अतः पद उसमें कल्पित ही माने जा सकते हैं ऐसे ही वाक्यार्थ में पदार्थ कल्पित होते हैं। पदों से वाक्य 'बनता' नहीं, पदार्थों से वाक्यार्थ भी बनता नहीं। अ-उ-म का समानाधिकरण अन्वय है और उपाध्यंशका बाधतः तथा उपहितांश की मुख्य अभेद वाक्यार्थ है। वाक्यार्थ को लक्ष्यमाण स्वीकारा जाता है। अतः 'ओंकारे' की टीकाव्याख्या है 'ओंकारलक्षिते'।

मूल में 'ओंकारोऽहम्येव' कहा है जिसका अर्थ है कि बाकी सब का प्रविलापन जिससे हुआ उस ॐ शब्द तथा ओमर्थताविशिष्ट को निज स्वरूप में विलीन करना चाहिये जिस स्वरूप को आगे 'अहमात्मा' आदि से कहना है। कुछ विद्वान् 'ओङ्कारोऽहमेव' पाठ का आदर करते हैं जिसमें अर्थ स्पष्ट है कि वक्ष्यमाण स्वरूप वाला चिन्मात्र ही ॐ-वाक्य का अर्थ है। आनंदगिरिटीका में प्रतीकोल्लेख न होने से निश्चित कहना कठिन है लेकिन 'मकारात्मकम्...ओंकारलक्षिते' के बाद किसी में ओंकार के विलय की चर्चा न होने से प्रतीत होता है कि वे 'अहमेव' पाठ स्वीकार रहे हैं।)

विलये प्रमाणम्

उक्तं हि—'जगत्प्रतिष्ठा देवर्षे ! पृथिव्यप्सु प्रलीयते। आपस्तेजसि लीयन्ते तेजो वायौ विलीयते।। वायुश्च लीयते व्योम्नि तच्चाव्यक्ते प्रलीयते। अव्यक्तं पुरुषे ब्रह्मन् ! निष्कले सम्प्रलीयते।। पुरुषान्न परं किंचित् सा काष्ठा सा परा गतिः।।' इति।

विष्णुपुराणादि में कहा भी है—'सब जिस पर स्थित रहते हैं वह पृथ्वी जल में प्रलीन होती है, जल तेज में और तेज वायु में विलीन होता है। वायु का विलय आकाश में तथा उसका अव्यक्त में लय होता है। अव्यक्त निरवयव पुरुष में भली-भाँति प्रलीन हो जाता है। पुरुष से परे कुछ नहीं है, वह सीमा है, वही अंतिम अधिष्ठान है।' इस तरह पुर्वोक्त प्रक्रिया प्रामाणिक ठहरती है।

समाधिः

(आत्मा साक्षी केवलश्चिन्मात्रस्वरूपः। नाज्ञानं नापि तत्कार्यं, किन्तु नित्यशुद्धबुद्धमुक्तसत्यस्वभावं परमानन्दाद्वयं प्रत्यग्भूतचैतन्यं ब्रह्मैवाहमस्मीत्यभेदेन अवस्थानं समाधिः।)

(टीकानुसार॰ द्वयं ब्रह्मैवाहमस्म्यहं ब्रह्मास्मीत्य॰—ऐसा पाठ प्रतीत होता है।)

मूल में बताया कि ॐ का वास्तविक अर्थ वह 'मैं' है जो सिर्फ आत्मा है, अहमाकार वृत्ति से सीमित नहीं है। आत्मा साक्षी है, केवल है, उसका निज रूप सिर्फ चित् (ज्ञान) है। आगे समाधि का स्वरूप समझाया : इसी अकम्प निश्चय वाला रहना समाधि है कि मैं अज्ञान या उसका कार्य नहीं हूँ वरन् सनातन, निरविद्य, ज्ञानरूप, निरुपाधि, अबाध्य प्रकृति वाला हूँ, ऐसा निर्भेद हूँ जो निःसीम आनंद है, कभी विषय न होने वाला बोध हूँ, ब्रह्म ही हूँ।

इसे टीका में और स्पष्ट करेंगे।

प्रत्यगात्मा

अकारादीनां पूर्वपूर्वस्य उत्तरोत्तरस्मिन्ननुप्रवेशेन प्रत्यगात्मनि पर्यवसितत्वेऽपि, प्रत्यगात्मा देहेन्द्रियमनोबुद्धिप्राणाहङ्काराव्याकृतानां मध्ये कतमः स्याद् ? इत्याशङ्क्याह—अहमात्मेति। देहस्तावदनात्मा—दृश्यत्वात्, जडत्वात्, परिच्छिन्नत्वाद्, आद्यन्तवत्त्वाच्च घटवत्। तथा इन्द्रियादीनाम् अव्याकृतपर्यन्तानाम् अनात्मत्वमवधेयम्। न च प्रतीचो देहादिसाक्षिणो जाड्यमुपपद्यते, जडत्वे घटादिवद् अनात्मत्वप्रसङ्गात्। तस्मादज्ञानं साभासमव्याकृतशब्दितं, तत्कार्यं देहादि अनात्मत्वेन प्रतिपत्तव्यम्। तद्व्यतिरिक्तश्चात्मा तदुभयसाक्षी चिद्धातुरेव द्रष्टव्य इत्यर्थः। केवलशब्देन चितो विषयनिरपेक्षत्वं विवक्ष्यते। चिन्मात्रशब्देन आत्मनो द्रव्यबोधरूपत्वं परेष्टं प्रत्याचष्टे—चिन्मात्रेति।

'अ' आदि पिछले का 'उ' आदि अगले में प्रविलापन करने से प्रत्यगात्मा बचा यह कहा। पुनः शंका होती है कि शरीर, इंद्रिय, मन, बुद्धि, प्राण, अहंकार, अव्याकृत में से प्रत्यगात्मा है कौन ? समाधान किया 'मैं' का स्वरूप बताकर। देह तो दृश्य, जड, सीमित और जन्म-नाश वाला होने से घट की तरह अनात्मा है। इन्द्रियों से अव्याकृत तक जितने पदार्थ कहे वे भी इन्हीं

कारणों से अनात्मा हैं। देहादि की सत्ता-स्फूर्ति में हेतुभूत विषय तया अप्रतीयमान ज्ञान जड तो हो नहीं सकता। यदि वह जड हो तो घटादि की तरह अनात्मा होगा (जिससे उसे विषयतया प्रतीत होना चाहिये जो वह होता नहीं) इसलिये आभास सहित अज्ञान और उसके देहादि कार्य अनात्मा हैं यही निर्णय रखना चाहिये। इनसे निरपेक्ष, इन दोनों का, कार्य-कारण का, साक्षी एकरस चेतन ही आत्मा समझना चाहिये। आत्मा को केवल कहा जिसका अर्थ है कि वह ऐसा ज्ञान है जो किसी विषय के होने न होने पर बिना निर्भर किये बना रहता है। आत्मा का स्वरूप 'सिर्फ चित्' कहा ताकि कुछ विचारकों की इस मान्यता का निरास हो जाये कि आत्मा जड-चेतन उभयात्मक है या ज्ञानभिन्न होकर ज्ञानगुणक है।

नित्यादिरूपः

एवम् अज्ञानतत्कार्यस्पर्शशून्यश्चिदात्मा परिशुद्धः त्वम्पदार्थः तत्पदार्थाद् ब्रह्मणोऽर्थान्तरं किं न स्याद्? इति मन्वानः सन्नाह—किन्त्विति। तत्पदार्थपरिशोधनपूर्वकं परिशोधितं त्वम्पदार्थमनूद्य तस्य ब्रह्मत्वं वाक्यार्थं कथयति—नित्येत्यादिना। 'आकाशवत्सर्वगतश्च नित्यः', 'अजो नित्यः शाश्वतोऽयं पुराणः' (कठ. २.१२) इति श्रुतिस्मृती समाश्रित्य कार्यैक्यं ब्रह्मणो नित्यत्वविशेषणेन निरस्यति। 'शुद्धमपापविद्धम्' (ई. ८) इत्यादिश्रुतिवाक्यावष्टम्भेन कार्यतादात्म्यवैधुर्यं ब्रह्मणः शुद्धविशेषणेनोच्यते। 'प्रज्ञानघनः' (बृ.४.५.१३) इति श्रुतिमाश्रित्य नित्यविज्ञप्तिरूपतां ब्रुवाणो बुद्धविशेषणेन कारणैक्यं ब्रह्मणो निषेधति। 'विमुक्तश्च विमुच्यते' (कठ. ५.१) इति श्रुतिमनुसृत्य अविद्याकामकर्मपारतन्त्र्यापाकरणेन कारणतादात्म्यं ब्रह्मणो मुक्तपदेन प्रत्याचष्टे। ऐक्यतादात्म्ययोश्च भेदाऽसहत्वभेदसहत्वाभ्यां भेदः।

विचार होता है कि अविद्या और उसके कार्य से असंबद्ध, सब दोषों से रहित चेतनरूप आत्मा जो त्वम्-शब्द का निष्कृष्ट अर्थ है वह तत्-शब्द

के अर्थरूप ब्रह्म से पृथक् क्यों न हो ? इसलिये तत्-शब्दार्थ का भी विवक्षित अर्थ कहते हुए निष्कृष्ट त्वंशब्दार्थ का उल्लेख कर बताते हैं कि त्वंशब्दार्थ ब्रह्म है। यह महावाक्य का अर्थ है। ब्रह्म 'नित्य' है अर्थात् कार्य प्रपंच से एक नहीं है। श्रुति व स्मृति में बताया है कि आत्मा आकाश की तरह व्यापक और नित्य है, जन्म रहित, नित्य, सनातन और प्राचीन है। 'शुद्ध' कहकर व्यक्त किया कि ब्रह्म का कार्यप्रपंच से तादात्म्य भी नहीं है। वेद में वताया है कि ब्रह्म शुद्ध है, पाप से बिंधा नहीं है। 'बुद्ध' शब्द से स्पष्ट किया कि ब्रह्म कारणभूत अज्ञान से एक नहीं है। वह तो हमेशा एकसी रहने वाली अपरोक्ष अनुभूति है, वह अज्ञानात्मक कैसे होगा! वेद ने घोषित किया है कि ब्रह्म निरवकाश विलक्षण ज्ञान ही है। 'मुक्त' से समझाया कि ब्रह्म अविद्या कामना या कर्म के अधीन नहीं अतः उसका कारणरूप अज्ञान से तादात्म्य भी नहीं है। श्रुति ने कहा ही है कि मुक्त होने वाला आत्मा वही है जो हमेशा मुक्त है ! कार्य-कारण से ऐक्य व तादात्म्य का निषेध किया; ऐक्य अर्थात् जहाँ भेद सह्य न हो और तादात्म्य जहाँ भेद सह्य हो जैसे घट कलश का ऐक्य है जबकि घट व रूप में तादात्म्य है।

सत्यः

ननु ब्रह्मणो यथोक्तस्य प्रपञ्चस्येव यथाकथंचिद् बाध्यत्वप्रसिद्धौ न प्रेप्सितत्वं परिकल्पते। न हि ब्रह्म प्रपंचाद् भिन्नम्, अब्रह्मत्वप्रसंगात्! अभेदे च तद्बाध्यत्वमभ्युपेयताम्। अतः कथं तदंभिन्नं ब्रह्म अबाध्यमभ्युपेयम् ? इत्याशंक्य; 'सत्यं ज्ञानमनन्तं ब्रह्म' (तै. २.१.३), 'सत्यस्य सत्यम्' (बृ २.१.२०) इत्यादिश्रुतिमनुसन्दधानः समाधत्ते—सत्येति।

प्रश्न उठता है : ब्रह्म प्रपंच से भिन्न तो होगा नहीं अन्यथा परिच्छिन्न होने से ब्रह्म ही नहीं रहेगा ! जब वह प्रपंच से अभिन्न है तब उसे प्रपंच की तरह बाध्य ही मानना होगा। चाहे प्रपंच रूप से ही सही, ब्रह्म बाध्य

है तो प्राप्तव्य नहीं हो सकता। अतः उसे अबाध्य कैसे समझें ? उत्तर है कि वह सत्य है, बाध के अयोग्य है। वेद ने सुस्पष्ट किया है कि लोकसिद्ध सत्य का अधिष्ठान जो अनन्त ज्ञान है वही पारमार्थिक सत्य है, ब्रह्म है। अतः प्रपंचातीत ब्रह्म प्राप्तव्य है। प्रपंचरूप न होने पर भी वह परिच्छिन्न नहीं क्योंकि उसी पर प्रपंच कल्पित है।

परमानन्दाद्वयः

तथापि न तस्मिन् प्रेप्सया प्रवर्तेत, पुरुषार्थत्वाभावाद् ? इत्याशंक्य; 'विज्ञानमानन्दं ब्रह्म' (बृ. ३.७.२८), 'आनन्दो ब्रह्मेति व्यजानात्' (तै. ३.६.१) इत्यादि श्रुतिमनुरुध्य ब्रूते—परमानन्देति। ब्रह्मानन्दस्य क्षयिष्णुत्वसातिशयत्वनिरासार्थं परमेति विशेषणम्। किं च यथोक्तं ब्रह्म द्वैताभावोपलक्षितम् इष्यते; अस्थूलादिश्रुतेः, स्वतः प्रमाणत्वात्। वस्तुतश्च प्रपंचाभावाद् भेदाभेदवाचोयुक्तेरयुक्तत्वाद् इत्यभिप्रायेण आह—अद्वयमिति।

सत्य के साथ ब्रह्म आनंद भी है जिससे वह सब द्वारा प्राप्तव्य है। ब्रह्म की आनंदरूपता न केवल प्रतिज्ञात है वरन् भृगु आदि के अनुभव से सत्यापित भी है। ब्रह्म को परम-आनंद कहते हैं ताकि ब्रह्मरूप आनंद क्षीण हो सकता है या उससे अधिक कोई आनंद हो सकता है यह न समझा जाये। इतना ही नहीं, नाम-रूप आदि द्वैत के न होने से ब्रह्म उपलक्षित अंगीकार्य है अर्थात् प्राप्तव्य ब्रह्म का उपलक्षण है द्वैतका न होना। इसमें वे वचन प्रमाण है जों ब्रह्मको स्थूलतादि से वर्जित बताते हैं। संसार में चाहे जितना 'अकेला' कुछ सिद्ध हो, उसके साधक प्रमाण की सहितता रहती ही है जैसे शुद्धतम रूप भी प्रकाशसहित ही दीखता है। अतः ब्रह्म सर्वथा अद्वितीय नहीं हो सकता, कम-से-कम उसका साधक प्रमाण तो उसे सद्वितीय बनाता होगा , इस शंका के समाधान में समझ लेना चाहिये कि ब्रह्म स्वयं ही स्वयं में प्रमाण है, स्वयंप्रकाश है। अतः साधकमाननिरपेक्ष होने से वह अत्यन्त अद्वय है।

वास्तव में तो प्रपंच है ही नहीं अतः यह विचार बेमानी है कि ब्रह्म का प्रपंच से भेद या अभेद है। इसलिये उसका अद्वैत वास्तविक है।

अत्यन्ताभेदः

परिशोधितं तत्पदार्थमनूद्य तस्य परिशोधितेन त्वम्पदार्थेन सहैक्यं वाक्यार्थं कथयति—ब्रह्मैवेति। एवकारः तादात्म्याङ्गीकारप्रयुक्तभेद-निरासार्थम्। तत्पदार्थमनूद्य तस्य त्वंपदार्थत्वं विधाय, त्वमर्थमनूद्य तस्य तत्पदार्थत्वं विदधाति—अहं ब्रह्मास्मीति।

निरुपाधिक तत्शब्दार्थ ईश्वर और निरुपाधिक त्वंशब्दार्थ जीव की एकता महावाक्य का अर्थ है जिसे मूल में 'ब्रह्म ही मैं हूँ' से व्यक्त किया। 'ही' से वह भेद मना किया गया है जो जीव-ब्रह्म में तादात्म्य मानने वालों द्वारा स्वीकारा जाता है। 'ब्रह्मैवाहमस्मि' को ही 'अहमेव ब्रह्मास्मि' यों भी पढ़ लेना चाहिये। प्रथम विन्यास द्वारा तत्पदार्थ का अनुवाद कर उसकी त्वंपदार्थता का विधान हो जाता है अर्थात् ब्रह्म जीव है बताया जाता है और द्वितीय विन्यास द्वारा त्वम्पदार्थ का अनुवाद कर उसकी तत्पदार्थता का विधान हो जाता है अर्थात् जीव ब्रह्म बताया जाता है। यों अत्यन्त अभेद स्पष्ट हो जाता है।

द्विविधः समाधिः

अथ जीवब्रह्मणोर्मिथो व्यतिहारेण एकरसस्वरूपवाक्यार्थप्रतिपत्त्यर्थं साधनभूतं समाधिं संगिरते—इत्यभेदेनावस्थानं समाधिरिति। पूर्वोक्तयुक्त्या प्रणवस्वरूपार्थानुसन्धानपुरःसरम् एकरसवस्तुमात्रत्वेन चित्तस्य तदाकारवृत्त्यवशेषाऽवस्थानं सम्प्रज्ञातसमाधिः इत्युच्यते। उक्तं हि 'ब्रह्माकारमनोवृत्तिप्रवाहोऽहंकृतिं विना। सम्प्रज्ञातसमाधिः स्याद् ध्यानाभ्यासप्रकर्षतः।।' इति।

वृत्तिमपि तन्मात्रत्वेनोपसंहृत्य वृत्तिमतः चित्तस्य प्रयत्नपूर्वकं वस्तुमात्रत्वेनावस्थानम् असम्प्रज्ञातसमाधिः इति गीयते। उक्तं च 'मनसो वृत्तिशून्यस्य ब्रह्माकारतया स्थितिः। याऽसम्प्रज्ञातनामाऽसौ समाधिरभिधीयते।।' इति।। अस्य च प्रयत्नपूर्वकत्वादेव सुषुप्तितो विशेषसिद्धिः सुषुप्तौ तु कारणात्मना चित्तस्यावस्थानमास्थितम्, इदं तु कार्यकारणसम्बन्धविधुरवस्तुमात्रत्वेन तस्य पर्यवस्थानमिष्यते। तद्वासनाविशेषाभ्युपगमाच्चास्य साधनपक्षपात इति भावः।

जीव ब्रह्म है, ब्रह्म जीव है—यों उलट-पलट कर दोनों की जो सर्वथा अभिन्नता बतायी उसे सही तरह समझने का उपाय समाधि है। पूर्वदर्शित रीति से ॐ के स्वरूपभूत अर्थ का विचार कर चित्त की सिर्फ एक वृत्ति बनाकर रखी जाये जिसमें वह परमार्थ अद्वैत व्यक्त हो तो उस स्थिति को संप्रज्ञात समाधि कहते हैं। बताया भी है कि अहंकारार्थ का उल्लेख बिना हुए मन ब्रह्म के आकार की वृत्तियाँ लगातार बनाता जाये तो सम्प्रज्ञात नामक समाधि होती है जो अत्यधिक ध्यानका अभ्यास करने से प्राप्त होती है।

जब वृत्तिको भी स्फुरमाण ब्रह्म से अलग न समझा जाये और कोशिश कर वृत्ति वाले चित्त को भी ब्रह्म से अतिरिक्त कुछ न जाना जाये तब समाधि को असम्प्रज्ञात कहा जाता है। यह अन्यत्र भी कहा है कि वृत्तिरहित मन का ब्रह्म के आकार में रहना असम्प्रज्ञात समाधि है। क्योंकि इसमें कोशिश से स्थिति बनती है इसलिये यह सुषुप्ति से विलक्षण है। गहरी नींद में तो चित्त कारण रूप से रहता है जब कि यह चित्त की वैसी विद्यमानता है जिसमें वह उस वस्तु से अलग हुआ नहीं रहता जो कार्य-कारणसंबंध से रहित है। क्योंकि इस समाधि से चित्त में ब्रह्मसंस्कार बढ़ते हैं इसलिये इसे साधन-कोटि में स्वीकारते हैं।

प्रमाणम्

('तत्त्वमसि', 'ब्रह्माहमस्मि', 'प्रज्ञानं ब्रह्म', 'अयमात्मा ब्रह्म' इत्यादिश्रुतिभ्यः। इति पञ्चीकरणं भवति । ॐ।।)

जीवब्रह्मणोरैक्ये श्रुतिं प्रमाणयति—अयमात्मा ब्रह्मेति। अत्र च ब्रह्मात्मपदयोः सामानाधिकरण्यं, पदार्थयोः विशेषणविशेष्यत्वं, ततो विरोधस्फूर्तौ पदार्थस्य निष्कृष्टस्य वस्तुमात्रेण लक्षणया सम्बन्धः, ततश्चाऽखण्डैकरसवाक्यार्थप्रतिपत्तिः। न चैकार्थत्वे पदभेदानुपपत्तिः, व्यावर्त्यभेदादर्थवत्त्वसिद्धेरिति द्रष्टव्यम्। आदि-पदेन तत्त्वमस्यादिमहावाक्यानि, तत्त्वं-पदार्थविषयाणि च अवान्तरवाक्यानि ब्रह्मात्मैकरसत्वे पर्यवसितानि ग्रहीतव्यानि।

अद्वैत में प्रमाण है महावाक्य जैसे सामवेद का 'वह तू है', यजुर्वेद का 'मैं ब्रह्म हूँ' ऋग्वेद का 'प्रज्ञानादि अनुभव करने वाला जीव ब्रह्म है', अथर्व वेद का 'यह साक्षात् भासमान आत्मा ब्रह्म है' इत्यादि। (टीकानुसार मूल में केवल माण्डूक्योक्त आथर्वण वाक्य का उल्लेख है जो इसलिये संगत है कि उसी उपनिषत् में प्रणव का अनुसरण किया गया है।) मूलकार ने इतना बताकर पंचीकरण प्रकरण उपसंहृत कर दिया है।

जीव ईश्वर के अभेद में वेद प्रमाण है जो कहता है कि यह साक्षात् होता आत्मा ही ईश्वर है। जीवेश्वराभेदबोधकवाक्य महान् तात्पर्य वाले अतः महावाक्य कहलाते हैं। इनमें जीव और ईश्वर दो पदार्थों का उल्लेख कर उनका अभेद व्यक्त किया जाता है। ईश्वरवाचक और जीववाचक पद समान विभक्ति में होने से इन वाक्यों में उभयवाचक पदों का आपसी संबंध सामानाधिकरण्य कहलाता है। दोनों वाच्य अर्थ आपस में विशेषण-विशेष्य बनकर सम्बद्ध होते हैं अर्थात् आपसी भेद की व्यावृत्ति करते हैं। भेदनिषेध से अभेद प्रतीत होने पर लगता है कि कही बात गलत है क्योंकि

परिच्छिन्न जीव व्यापक ईश्वर नहीं हो सकता। किंतु वेदवाक्य गलत बात नहीं बतायेगा अतः निश्चय ही वेद का अभिप्रेतार्थ समझना जरूरी है। जहाँ वाच्यार्थ से असंगत वाक्यार्थ निकले वहाँ लक्ष्यार्थ ग्रहण करना लौकिक रीति है। श्रुतिको अभिप्रेत अर्थ शब्द से हम समझें इसके लिये हम विचारपूर्वक जो अर्थनिर्धारण करते हैं वही शब्द की लक्षणा वृत्ति है। प्रकृत में प्रथमतः उपाधियुक्त जीव ईश्वर प्रतीत होते हैं लेकिन विवक्षितार्थबोधक वाक्यान्तरों की आलोचना से पता चलता है कि जीव-ईश्वरबोधक पदों का जो निचोड़भूत अर्थ यहाँ अभिप्रेत है वह उपाधि छोड़ा हुआ चेतन है। उन अर्थों का वाक्यार्थरूप अद्वैत वस्तु से लक्षणा द्वारा संबंध होता है। (वाक्यार्थ का पदार्थों से सम्बंध होता है जिसके सहारे पद वाक्यार्थ का ज्ञान करा देते हैं अतः पद लक्षणा से वाक्यार्थ-बोधक होते हैं। वाक्यार्थ-बोध में अनुकूल होना ही पदार्थों का वाक्यार्थ से लक्षणानामक सम्बन्ध है।) लक्षणा से वाक्यार्थ समझ आने पर निष्प्रकारक, निर्विशेष वाक्यार्थ की स्फूर्ति हो जाती है। (वाक्यार्थ के इस क्रमको नैष्कर्म्यसिद्धि, संक्षेपशारीरक, पंचप्रक्रिया आदि से स्पष्ट कर लेना उपयोगी होगा।) प्रश्न होगा कि महावाक्य में आये जीव-बोधक और ईश्वर-बोधक पद यदि एक ही अर्थ के प्रकाशनार्थ हैं तो पर्यायवाची होने से उनका एक ही वाक्य में इकट्ठे प्रयोग क्यों ? उत्तर है कि एक ही अर्थ के बारे में अलग-अलग गलत फहमियाँ हैं जिन्हें हटाने के उपयोग से वे अलग-अलग शब्द रखे हैं। अभिप्रेतार्थ एक होने पर भी उक्त प्रयोजन के साधक होने से वे पर्यायवाची नहीं हैं। एवं च चेतन की परोक्षता का भ्रम मिटाने के लिये जीवबोधक तथा परिच्छिन्नता का भ्रम मिटाने के लिये ईश्वर-बोधक शब्द महावाक्यों में आये हैं। मूल में जो 'इत्यादि' कहा उससे 'तत्त्वमसि' आदि सभी महावाक्य और अवान्तरवाक्य समझ लेने चाहिये। तत् या त्वम् पदार्थों का खुलासा करने वाले—जीवब्रह्मैक्य बिना बताये सिर्फ जीव या ब्रह्म के बारे में समझाने वाले—वाक्य अवांतर वाक्य होते हैं।

उदाहरणार्थ तत्पद के वाच्यार्थ को बताने वाले 'यतो वा इमानि भूतानि' आदि एवं लक्ष्य को कहने वाले 'सत्यं ज्ञानम्' आदि अवान्तर वाक्य हैं। इसी तरह त्वम्पद के वाच्यबोधक 'तद्यथा महामत्स्यः...उभावन्तावनुसंचरति' आदि तथा लक्ष्य-बोधक 'हृद्यन्तर्ज्योतिः पुरुषः, न दृष्टेर्द्रष्टारं पश्येः' आदि अवांतरवाक्य हैं। चाहे अवांतर हों या महान्, दोनों का चरम तात्पर्य है, ईश्वर से जीव के आत्यन्तिक अभेद में। ऐसे ही वाक्य यहाँ 'आदि' शब्द से लेने चाहिये, इनसे विरुद्ध नहीं।

उपसंहारः

तदेवम् अधिकारिणो वाक्याद् ब्रह्मात्मैक्यसाक्षात्कारसमुत्पत्तौ, अज्ञानतत्कार्यनिवृत्तौ, अनारब्धफलपूर्वोपार्जितकर्मदहनात्, उत्तरकालीन-कर्मणश्च अश्लेषात्, आरब्धफलकर्मणश्च भोगेनैव क्षयात्, तदवस्थितिप्रयुक्तदेहावभासजगदवभासनिवृत्तौ, तदात्मना तत्कारण-कर्मात्मनाऽवस्थिताविद्याऽभावात्, तत्कार्यनिवृत्तेश्च वस्तुस्वरूपेणैव परिशेषात्, प्रत्यगात्मा सच्चिदानन्दात्मकः सत्यज्ञानानन्तानन्दस्वरूपं ब्रह्मैवेति सिद्धम्।

इस प्रकार इस ग्रंथ में यह सब निश्चित किया गया है—मोक्षोपयोगी ज्ञान का शास्त्रोक्त अधिकारी होता है जिसे महावाक्य-श्रवणकर जीवेश्वराभेद का अपरोक्ष निश्चय हो जाता है क्योंकि शब्द भी अपरोक्षका सक्षम उपाय है। इस साक्षात्कार से अज्ञान और उसका कार्य बाधित हो जाते हैं अर्थात् यह निर्धारित रहता है कि वे हैं नहीं। पूर्वकृत जिन कर्मों ने फल देना प्रारंभ नहीं किया वे तो इस तत्त्वनिश्चय से मानो जल जाते हैं और तत्त्वधी के बाद जो कर्म किये हुए प्रतीत होते हैं उनका आत्मा से कोई संबंध हुआ नहीं करता—कारण कि कर्म-आत्मा का कर्तृताभिमानरूप ही सम्बन्ध है जो अध्यास ही है अतः तत्त्वज्ञान से हट चुकता है—इसलिये उक्त दोनों तरह के कर्म फलप्रद नहीं रहते। जिन कर्मों ने वर्तमान शरीर का निर्माण कर

फलदान आरंभ कर दिया है उनके फल भोगने से वे कर्म समाप्त हो ही जाते हैं। जब तक उनका फल भोगा जाये तब तक अप्रतिबद्ध तत्त्वनिष्ठ को जीवन्मुक्त कहा जाता है। देहोत्पादक कर्म रहते ही देह और जगत् का अवभास (प्रतीति) रहा करता है। जब वह कर्म भोग कर समाप्त हो जाये तब वह अवभास भी मिट जाता है। तत्त्वज्ञान के बाद शरीर और उसके संचालक प्रारब्ध कर्म के रूप में ही अविद्याप्रतीति बची थी, अब उन दोनों रूपों में भी वह रह नहीं जाती क्योंकि बाधित अविद्याकी प्रतीति रूप अविद्यालेश का अब कोई उपयोग रह नहीं जाता। जो प्रारंभ में अधिकारी था वह इस दशा में केवल ब्रह्मवस्तु रह जाता है। अतः निश्चित है कि जो हमें अपना विषयविलक्षण 'मैं' यों स्वरूप भासता है वह स्वभावतः सच्चिदानंद है, ब्रह्म ही है जो अबाध्य, चेतन, निःसीम, सुख स्वरूप है।

अन्त्यमङ्गलम्

षड्विधं लिङ्गमाश्रित्य वेदान्ता यत्र निष्ठिताः।
विधानप्रतिषेधाभ्यां तं वन्दे पुरुषोत्तमम्।।

।। इति श्रीमदानन्दगिर्याचार्यविरचितं पञ्चीकरणविवरणं सम्पूर्णम्।।

विचारकों ने छह तरह के चिह्न बताये हैं जिनसे निश्चित होता है कि उपनिषदों का तात्पर्य अखण्ड अद्वितीय ब्रह्म है। वे चिह्न हैं—(१) प्रतिपादन का प्रारंभ जिस अर्थ के बोधन से हो, समापन भी उसी के बारे में बातने से हो। (२) प्रतिपादन के दौरान बार-बार उस अर्थ का उल्लेख कर कुछ खुलासा किया जाये, उसका कथन अन्य प्रयोजन से न हो। (३) वह अर्थ उस प्रतिपादन से निरपेक्ष किसी प्रमाण का विषय न हो। (४) उस अर्थ की जानकारी प्रयोजन सिद्ध करे। (५) उसकी प्रशंसा हो, उससे विपरीत की निंदा हो और उसे समझाने मात्र के उद्देश्य से ऐसा कुछ बताया जाये जिसका स्वयं में कोई अन्य उपयोग न हो। (६) उस अर्थ को तर्क व अनुभव

से संगत किया जाये। इन छह से पता चलता है कि उपनिषत् तात्पर्यतः जिसे समझाती हैं वह उत्तम पुरुष अर्थात् सर्वोपाधिविनिर्मुक्त प्रत्यङ्मात्र है। औपाधिक आत्मरूपों का निषेधमात्र कर उपनिषत् अद्वैतका उपदेश देती है क्योंकि स्वप्रकाश तत्त्व की ग़लतफ़हमी ही हटाना जरूरी होता है 'उसे' बताना नहीं, कारण कि वह बताये बिना ही सदा भासता है और 'उसे' बताया जाये तो यह मुग़ालता लग सकता है कि वह शब्द से वोध्य अतः परिच्छिन्न है। किंतु केवल निषेध से बताने पर कदाचित् प्रतीत हो सकता है कि निःस्वरूप की चर्चा है ! इसलिये पूर्ण सावधानी बरतते हुए उपनिषत् ने महावाक्यादि में भावरूप से भी उस परमार्थ का प्रकाशन कर दिया ताकि शून्य जैसा कुछ न समझ लिया जाये। दोनों ढंगों से सब भ्रम मिट जाते हैं। यों बताये पुरुषोत्तम की मैं वन्दना करता हूँ। अभेदानुसंधान ही मुख्य वन्दना है।

इस प्रकार श्रीमच्छंकराचार्यकृत पंचीकरण एवं श्रीमान् आनंदगिरिस्वामिकृत उसका विवरण पूरा हुआ।

वृषस्यन्त्याः पराविद्यामहाधेनोः शमक्षमः।
पुंगवध्वजपुंरूपः श्रीमदाचार्यपुंगवः।।
वेदान्तानवगन्तुं ये ह्यर्था आवश्यका मताः।
कृपयैकत्र तान् कृत्वाऽऽनन्दज्ञानोऽजयन्मुनिः।।

ॐ

■■■